काश्मीरवासं संविधायाशु मब्दं सर्वस्वेनाप्यर्चयामास विप्रम् ।
दैवं शास्त्रं पाठयामास तत्र गर्भे पत्नी कल्पिता बालजस्य ॥
विनिश्चित्यायुषः शेषं राज्ञा सम्मानितः पुनः ।
तृतीयवारं सम्मानानुभित्वा मुक्ततां ययौ ॥
राधाकृष्णस्तत्सुतः सर्वशास्त्रवेत्ता दृष्ट्वा मोचयोगौ यजस्तां(?) ।
चक्रे तस्यार्थावगत्यै प्रयत्नं प्रज्ञामात्ये चिन्तितार्थप्रदां ताम् ॥

न सन्ति शास्त्राणि किमेदानि(?)
कलौ तु चिन्तामणिरिष्टदोऽस्ति ।
अतस्तदर्थावगतौ प्रयत्नः
यतो विदां तत्र महान् प्रयत्नः ॥

Last Colophon :

इति श्रीमन्नवपुरनिवासिज्योतिर्विच्चिन्तकमिश्रदिवाकचन्द्रात्मज-पण्डितवर्यराधाकृष्णकृतसर्वार्थचिन्तामण्यर्थावगतौ पञ्चाङ्गादिसंज्ञेया-र्थावगतिषट्त्रिंशत्तमोऽध्यायः ।

Post-colophon :

समाप्ता चेयं सर्वार्थचिन्तामण्यर्थावगतिटीका निर्मिता राधा-कृष्णेन विदुषा विक्रमार्कराजप्रभृति संवत्सरं १८६५ अन्तर्गत-मिथुनार्कतो गताहे १० ।

For other MSS. of the text see Rājendra Lal Mitra's Notices; Notices, VIII, p. 304; Bhandarkar, Cat. Deccan MSS., pp. 241, 406; Burnell, Tanjore MSS., p. 78B and IO. Catal. No. 3108.

It is an authoritative work on omens and astral influences.

7343.

8712. सर्वार्थचिन्तामणिः । *Sarvārthacintāmaṇi.*

By Veṅkaṭanāyaka.

Substance, country-made paper. 10½ × 4 inches. Folia, 70. Lines, 7 on a page. Extent in ślokas, 1,100. Character, Nāgara. Date, Śaka 1765 (?). Appearance, old. Complete.

Complete in 70 leaves and eight chapters. The number of *ślokas* "मनुष्टुप् ११५५".

Post-colophon :

सङ्कवैरिचनसम्मिते शके श्रावणे ज्वलतिथौ वसून्मिते ।
शौरिकदिशो लीलखत् कुजदिने श्रुलेलापुरे ॥

It begins :

श्रीमच्छेषगिरेस्तटाधिनिलयं श्रीवेङ्कटेशं गुरुं
नत्वा वेङ्कटनायकस्त्वनुदिनं जातोऽप्ययथार्थ्यात् सुधीः ।
ज्योतिःशास्त्रभवाब्धिपारगमने वक्ष्यामि पोतात्मकं
ज्योतिःशास्त्रविवेकपापविदुषां सर्वार्थचिन्तामणिम् ॥ १ ॥

Verses 2 and 3 are salutations to Gaṇeśa and Sarasvatī :

यज्जातके निगदितं भुवि मानवानां
तत्प्राश्निकेऽपि सकलं कथयन्ति तज्ज्ञाः ।
प्रश्नेऽपि जन्मसदृशो भवति प्रभेदः
प्रश्नस्य चात्र जननस्य न भेदलेशः ॥ ४ ॥
भौमास्फविच्चन्द्ररविज्ञशुक्रवक्रेज्यमन्दार्कसुतामरेज्याः ।
मेषादिभानामधिपाः क्रमेण तदंशकानामपि ते भवेयुः ॥

7344.

1059D. सुश्लोकशतकम् । *Suślokaśataka.*

By Miṭhṭhana Śukla.

Substance, country-made paper. 12 × 5 inches. Folia, 7. Lines, 7 on a page. Extent in ślokas, 168. Character, Nāgara. Date, Saṃvat 1906. Appearance, discoloured. Complete. Worm-eaten.

A short treatise on horoscopy.

Beginning :

The *maṅgalācaraṇa* and the object of the work :

महेशं प्रणिपत्यादौ स्फुटं पाराशरं मतम् ।
करोमि सुखबोधाय सुश्लोकशतकं मुदा ॥

But actually there are not 100 *ślokas*.

2B, इति श्रीमच्छुकलमिट्ठनशर्मरचिते संज्ञाध्यायः प्रथमः (number of *ślokas*, 33); 5B, इति सुश्लोकशतके द्वितीयोऽध्यायः (32 *ślokas*)! 6B, इति तृतीयोऽध्यायः (18 *ślokas*).

Last Colophon :

इति श्रीमिट्ठनशुक्लविरचितं सुश्लोकशतं (number of *ślokas*, 13).

Post-colophon :

संवत् १६०६ चैत्रशुक्लदशमी सोमे ॥

The work ends :

भारद्वाजकुले रामदेवो देव इवापरः ।
छोलस्तस्य कुले जातस्तत्सुतौ द्वौ बभूवतुः ॥
उदयो भैरवश्चापि तदग्रस्य सुतास्त्रयः ।
देऊश्च तिलकश्चापि गोवर्द्धन इति श्रुताः ॥
तिलकस्य कुले शुक्ल शिशुनामेति विश्रुतः ।
तत्सुतो मिट्ठनो येन कृतं पाराशरं स्फुटम् ॥ १० ॥

Bengali Edn. by Pandit Ksetranath Jyotiratna of Nadia, published in 1893 A.D.

7345.

10525. सन्तानदीपिका । *Santānadīpikā.*

Substance, foolscap paper. 11 × 2 inches. Folia, 8. Lines, 6 on a page. Extent in ślokas, 160. Character, Nāgara of the 19th century. Appearance, fresh. Complete.

Colophon :

इति सन्तानदीपिका समाप्ता(प्तः) ।

Maṅgalācaraṇa :

गुरुनाथं नमस्कृत्य गणनाथं प्रणम्य च ।
वाग्देवीवन्दनं कृत्वा स्मृत्वा तं कमलोद्भवम् ॥
... ...
वासुदेवं गुरुं ध्यात्वा वक्ष्ये सन्तानदीपिकाम् ॥

The object of the work :

वाराहहोरामालोक्य तथा जातकपद्धतिम् ।
सारावलिं तथा दृष्ट्वा पाराशरमतं तथा ॥
प्रश्नशास्त्राणि चान्यानि समालोक्य मुहुर्मुहुः ।
तत् तत् सारं समुद्धृत्य वक्ष्ये सन्तानदीपिकाम् ॥
अज्ञातमल्पबुद्धीनां हितार्थं वक्ष्यते मया ।
सन्तानदीपिकाशास्त्रमुपदेशार्थदर्शनम् ॥

It ends :

सन्तानदीपिकाशास्त्रमेकविंशोत्तरं शतम् ।
पद्यैः पदैश्च (पद्यपदैश्चर्य) यत् प्रोक्तं तज्जनः परिगृह्यताम् ॥

Aufrecht in his Cat. Cat. I registers *Santānadīpikā* by the three authors, namely, Keśava, Mahādeva and Harināthācārya.

The present MS. does not give the author's name.

7346.

10785. सोमसिद्धान्तः । *Somasiddhānta.*

A book on astrology.

Substance, country-made paper. 16×3¼ inches. Folia, 22. Lines, 6 on a page. Extent in ślokas, 462. Character, Bengali. Date, Śaka 1777. Appearance, old and discoloured. Complete.

Colophon :

इति सोमसिद्धान्तः ।

After a line and a half :

लिपिरियं श्रीमोहनदेवशर्मणः पुस्तकञ्च ॥ शकाब्दा १७७७ ॥
तारिक २६ आश्विन । श्रीरामः शरणं ।

A work on horoscopy, different from *Somasiddhānta*, as described in L. 1904.

Beginning :

ॐ नमो नवग्रहेभ्यो नमः ।

अथ क्षेत्रादिफलं ।

कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनिभुवाम् ।
जीवार्किभानुजेज्यानां क्षेत्राणि स्युरजादयः ॥
दक्षस्त्यागी शुचिः शूरो मेधावी गुणमन्मथः ।
नानाशास्त्रैः समायुक्तो रविक्षेत्रे प्रजायत ॥
भौमक्षेत्रे नरो जातः क्रोधनो मत्तचेष्टकः ।
मिथ्यावादी प्रमादी च स भवेद्भूमिमण्डनः ॥

1, इति क्षेत्रफलं; 2A, इति होराफलं; अथ द्रेक्काणफलं; 3A, अथ नवांशफलं; 3B, अथ द्वादशांशफलं; 4A, त्रिंशांशफलं; 4B, अथ वारफलं; 6B, इति नक्षत्रफलं; 8A, इति राशिफलं; इति लग्नफलं; 9A, इति तुङ्गफलं; 9B, अथ मासफलं; 11A, अथ केन्द्रफलं; 13A, इति तनुस्थानफलं; 21B, इति राजयोगः ।

It ends :

मृगे सौम्यार्कशुक्रस्थे मन्दे मेषे विलग्नगे ।
कीटे विधौ कुजे चापि योगः ख्यातो कृतान्तनः ॥
दारिद्र्यदुःखानलतप्तदेहः चिरप्रवासी फलमूलभोक्ता ।
नीरं पयोधेरपि शोषकः स्यात्कृतान्तने + मनुजोनुजातः ॥

7347.

8217. स्वप्नचिन्तामणिः । *Svapnacintāmaṇi.*

By Jagaddeva, son of Durlabharāja.

Substance, country-made paper. 8½ × 3½ inches. Folia, 7. Lines, 16, 17 on a page. Character, Nāgara of the 18th century. Appearance, old and discoloured. Complete.

On the interpretation of dreams.

Beginning :

श्रीगणेशाय नमः ।

कविभिः करकलितमिव त्रैलोक्यमिदमालोक्य सद्यः ।
आसाद्य यत्प्रसादं सा जयति सरस्वती देवी ॥
कृतिभिः कृतानि संज्ञोद्देशेन स्वप्नलक्षणा + + ।
तान्येकस्थानि शुभानि संक्षेपतो वक्ष्ये ॥

4A, इति महत्तमश्रीदुर्लभराजात्मजजगद्देवविरचिते स्वप्नचिन्तामणौ शुभस्वप्नाधिकारः समाप्तः ।

There are 152 *ślokas* above the colophon.

Last Colophon :

इति श्रीमहत्तमदुर्लभराजात्मजजगदेवविरचिते स्वप्नचिन्तामणौ दुःस्वप्नाधिकारः ।

There are 158 *ślokas* above the colophon.

7348.

5255. स्वप्नफलम् । *Svapnaphala.*

Substance, country-made yellow paper. 17 × 3¼ inches. Folium, 1. Lines, 11 in all. Character, Bengali in a modern hand. Appearance, fresh.

On the interpretation of dreams.

इति स्वप्नफलम् । Described as an extract from the *Matsya Purāṇa.*

7349.

7783. हंसचक्रम्। *Haṃsacakra.*

Substance, country-made paper. 10×5 inches. Folia, 9. Lines, 11 on a page. Extent in ślokas, 190. Character, modern Nāgara. Appearance, fresh. Left incomplete.

A work in a dialogue between Śiva and Durgā, on divination.

Beginning:

श्रीगणेशाय नमः।

अथ हंसचक्रप्रश्नः।

पार्वत्युवाच।

देवदेव महादेव त्रिकालज्ञ महेश्वर।

ब्रूहि मे हंसचक्रस्य प्रकारं पूर्वसूचितम्॥

श्रीशिव उवाच।

हंसचक्रं प्रवक्ष्यामि शृणु त्वं स्वस्थमानसः।

पूर्वाह्णे तु बालमुखात् पुष्पनामं तु ग्राहयेत्॥

मध्याह्ने युवतिमुखात् फलनामं तु ग्राहयेत्।

अपराह्णे वृद्धमुखात् वृक्षनामं तु कारयेत्॥

अकारादिहकारांताः वर्णानां ध्रुवका शृणु।

अर्क १२ प्रकृति २१ ईशान ११ धृति १८ पंचदशैस्तथा।

जाति २२ रष्टादश १८ रदा ३२ तत एकोनविंशतिः॥

7350.

2928. हायनरत्नम्। *Hāyanaratna.*

(Being a work on horoscopy.)

By Balabhadra, son of Dāmodara.

An astrological work.

For the MS. and the work see L. 4090.

See W., pp. 264, 265. After the end of Weber's MS., our MS. has two verses more at the end.

Aufrecht gives the date of the composition of the work as 1656 A.D. But his source of information is not ascertainable. The work was composed at Rajmahal when Shah Suja, the son of Emperor Shahjahan, was the governor of Bengal.

It ends thus :

पृथ्वीपतिमहावीरश्रीमत्साहिसुजान्तिके ।
श्रीराजमहलस्थेन मया ग्रन्थं विनिर्मितम् ॥
योगो मासकृतैः समः कर(२)हतो योगस्तिथिः स्यात् ।
तिथिस्त्रिघ्नावारमितिस्तदर्धं सदृघ्नं भं सर्वयोगे पुनः ॥
भूबाणाब्धि (१५५१) कुभिर्भवेच्छकमिति ग्रन्थस्य × ×
× × × × × ×

इति श्रीदैवज्ञवर्यपंडितदामोदरात्मजबलभद्रविरचिते हायनरत्ने मासप्रवेशादिविचाराध्यायोऽष्टमः समाप्तः ॥ शुभं भूयात् ।

Post-colophon :

आश्विने कृष्णपक्षस्य द्वादश्यां गुरुवासरे ।
लिखितं विष्णुमिश्रेण दिल्लीपपुरवासिना ॥
संवत् १८७९ शाके १७४४ ॥

7351.

10461. हिल्लाजदीपिका । *Hillājadīpikā.*

By Nṛsiṃha.

Substance, country-made paper. 9 × 4 inches. Folia, 5. Lines, 14 a page. Extent in ślokas, 210. Character, Nāgara of the 18th century. Appearance, fresh. Incomplete at the end.

This is a work on horoscopy, according to the Yavana school. See L. 4095.

In the third *śloka* (the second, quoted by Rājendralāla) the present MS. has हिल्लाजजातक instead of हिल्लाजताजिक in the MS. of R. Mittra.

After the *ślokas* quoted by Rājendralāla, as the beginning of the work, we have:

आद्यं वशिष्ठगदितं शिवजं मया यत्
प्राक् सौरमर्ककथितं मुनिपौलिशं च ।
म्लेच्छेषु रोमकमतं त्वनुभूतिसिद्धं
स्याज्ज्योतिषं रसविभेदमितिक्रमेण ॥
केशवविष्णुमुखनिर्गतशापान्म्लेच्छताधिगततिग्ममरीचेः ।
रोमकेण पुरि लब्धमशेषं तद्द्विजातिभिरतोऽध्ययनीयम् ॥
यन्त्रैः स्फुटोऽत्रसमयो जनुषोऽत्र खेटाः
वेद्या यथा गणितदृक् समतास्फुटाश्च ।
लग्नं स्फुटञ्च चलयुक् तनुतोभजाङ्काः
खं षड्युगानि कुयुगानि पुनश्च मेषात् ॥ etc. etc.

1B, गर्गोग्रगुरुतः प्राप्तसम्मतिः कृतवान् द्विजः ।
हिल्लाजदीपिकाख्यायां नृसिंहो भावसाधनम् ॥

1B, ॰हिल्लाजदीपिकाख्यायां नृसिंहो दृष्टिसाधनम् ॥

2A, ॰नृसिंहो भावसाधनम् ॥

2B, ॰त्वहिल्लाजकम् ॥
गर्गो॰ बलनिर्णयम् ॥

3A, गर्गो॰ दायसाधनम् ॥
गर्गो॰ पाकसाधनम् ॥

3B, गर्गो॰ रिष्टनिर्णयम् ॥

4A, गर्गो॰ रिष्टनाशनम् ॥

4A, गर्गो॰ परमायुषम् ।

4B, गणे० दशाफलम् ।

4B, गणे० रिष्टभंगकौ ॥

5A, गणे० स्वांशजं फलम् ।

5B, गणेश० सदसत्फलम् ॥

5B, गणेशगुरुतः प्राप्तसम्मतिः कृतवान् द्विजः ।

हिल्लाजदीपिकायाख्यायां नृसिंहश्चेष्टदायकम् ॥

After this there are only two lines and a half. The MS. ends abruptly.

7352.

2912. हिल्लाजदीपिका । *Hillājadīpikā.*

For the MS. and the work see L. 4095.

In the following verses, the author justifies the study of the *Tājika*, although coming from foreigners:

ब्राह्मं वशिष्ठगदितं शिवजं मयाय
प्राक् सौरमर्ककथितं मुनिपौलिशं च ।
म्लेच्छेषु रोमकमतं त्वनुभूतसिद्धं
स्याज्ज्योतिषं रसविभेदमितिक्रमेण ॥ ५ ॥

केशविष्णु(?)मुखनिर्गतशापान्-
म्लेच्छताधिगततिग्ममरीचेः ।
रोमकेण पुरि लब्धमशेषं
तद्द्विजातिभिरतोऽध्ययनीयम् ॥ ६ ॥

Contents of the book:

यत्नैः स्फुटोऽत्र समयो अनुषोऽत्र वेद्याः
खेटाः प्रथा गणितदृक् समतास्फुटाश्च ।
लग्नं स्फुटं चलनयुक् तनुतो भजाङ्गाः
खं षड्युगानि कुयुगानि पुनश्च मेषात् ॥ ७ ॥

भागादिकात् त्र्यंशचयेन हृतात् खरामैः
लब्धेन हीनसहितः क्रमशः पलैस्तैः ।
राश्यर्द्धकं चलनयुक् तनुतः पदेऽत्र
युक्तं समे च विषमे वियुतं तदंशैः ॥

7353.

2258. हिल्लाजताजिकम् । *Hillājatājika.*

Substance, country-made paper. 11 x 4½ inches. Folia, 15. Lines, 9 on a page. Character, Nāgara. Complete.

For the MS. and the work see L. 4096.

Begins thus :

श्रीगणेशाय नमः ।

वर्षलग्नपः रन्ध्रेशो चतुर्थो निधनान्तगैः ।
मुन्थेशो यत्र गोत्र[पः] तद्वर्षे मरणं ध्रुवम् ॥ १ ॥
चन्द्रो पापान्वितो रन्ध्रे लग्ने शौरिगतेऽस्तगे ।
तद्वर्षे च भवेन्मृत्युः रक्षिता यदि शङ्करः ॥ २ ॥
मुन्थेशोऽत्र त्रिके स्थाने जन्मलग्नाधिपेऽस्तगे ।
तद्वर्षे च भवेन्मृत्यु पुत्रमानाधनादिकम् ॥ ३ ॥
etc. etc. etc. etc.

Ends thus :

वर्षेशे चार्कपुत्रे निजभवनगते स्वोच्चगे वाथकेन्द्रे
कर्मेशे वीर्ययुक्ते शुभग्रहसहिते भूपतुल्यं स्ववंशे ।
मूलं शत्रोर्विनाशो विविधसुखकरं पुत्रपौत्रादिकं च
भूपार्थलाभं सकलग्रहकृतं रिष्टयोगादिनाशम् ॥ २२७ ॥

Post-colophon :

इति श्रीहिल्लाजाताजिकं संपूर्णम् । संवत् १९१५ मिति चैत्र-
शुक्ल २ चन्द्रवासरे शुभं भूयात् ॥

7354.

9427. होराचक्रम् । *Horācakra.*

Substance, country-made paper. 9 x 5½ inches. Folia, 15. Lines, 10 on a page. Extent in ślokas, 210. Character, Nāgara. Date, (?). Appearance, very old. Prose and verse. Generally correct. Complete.

It is an elementary treatise on astrology.

Colophon :

इति होडाचक्रं सम्पूर्णं ।

Printed and published by the Venkateswara Press, Bombay.

7355.

9253. होराचक्रम् । *Horācakra.*

Substance, country-made paper. 10 x 5 inches. Folia, 3. Lines, 9 on a page. Extent in ślokas, 42. Character, Nāgara. Date, (?). Appearance, tolerable. Prose. Generally incorrect. Complete.

It begins thus :

ॐ श्रीगणेशाय नमः ।

अथ होडाचक्रं लिख्यते ।

प्रणम्य भारतीं भक्त्या गणेशञ्च गजाननम् ।

समाहृत्यान्यग्रन्थेभ्यो होडाचक्रं विरिच्यते ॥ १ ॥

आदित्य ॥ १ ॥ चन्द्र ॥ २ ॥ मङ्गल ॥ इत्यादि ।

End :

ताला मेष ॥ १ ॥ उवा वृष ॥ २ ॥ काछा मिथुन ॥ ३ ॥ डाहा कर्काट ॥ ४ ॥ मोठा सिंह ॥ ५ ॥ पाता कन्या ॥ ६ ॥ राता तूला ॥ ७ ॥ नया वृश्चिक ॥ ८ ॥ याघा धनु ॥ ९ ॥ गोसा मकर ॥ १० ॥ सोदा कुम्भ ॥ ११ ॥ दोचा मीन ॥ १२ ॥ इति संक्षेपराशि ।

Colophon :

इति होराचक्रं सम्पूर्णं ।

7356.

8514. होराप्रकाशः (सारसिद्धान्तः) ।

Horāprakāśa (Sārasiddhānta).

A work on Jyotiṣa in the form of a dialogue between Ravi and Aruṇa.

Substance, country-made paper. 10½ × 5 inches. Folia, 55. Lines, 10 on a page. Extent in ślokas, 780. Character, Nāgara. Date, Saṃvat 1690. Appearance, old and discoloured.

To the end of the 10th chapter.

Beginning :

श्रीगणेशाय नमः । श्रीसूर्याय नमः ।

अरुण उवाच ।

आनन्दयन् बुधमनः सकलं स्वभाभिः
प्रध्वंसयन् सकलदुर्दिनमन्तरस्थम् ।
कल्पान्तरोपचितकर्मविलोकहेतुः
स ज्ञानभास्कर उदेतु हृदम्बरे मे ॥ १ ॥
तुभ्यं नमः सकललोकहितोदयाय
संसारसागरसमुत्तरणप्लवाय ।
दुःकर्मधर्मभयरोगतमोनुदाय
ब्रह्मो ग्रहान् मुनिगणैरुपसेविताय ॥ २ ॥
अनुग्राह्योऽस्म्यहं देव भवता परमेष्ठिना ।
यत्पादपद्मशरणं शरण्योऽस्म्यहं यतः प्रभो ॥ ३ ॥
होराशास्त्रं परं ब्रह्म व[वे]दचक्षुस्तमोऽन्तकृत् ।
विज्ञानं सर्वजन्तूनां अण्डजास्थिरजङ्गमाः ॥ ४ ॥

एकनक्षत्रजातानां एककर्मनिषेविणाम् ।
एककुलसम्भूतानामेकदेशनिवासिनाम् ॥ ५ ॥
नानात्वं दृश्यते वत्स पूर्वकर्मवशादिह ।
काणो च वधिरो वापि जडोन्मत्तो मदभ्रमी ॥ ६ ॥
सधनो निर्धनो वापि कथं ज्ञाये तमोऽन्तकृत् ।
चतुरशीतिसमं संख्या जीवानां जातिनिर्णयः ॥ ७ ॥
अण्डजो ह्युद्भिज्जो वाथ जरायुः स्वेदजोऽथवा ।
एवं कामक्रमेणैव कालाद्वेतः प्रजायते ॥ ८ ॥
रेतसोत्पत्तिजन्तूनां नानाजीवजरायुजाम् ।
एवमण्डजजातीनां स्वेदजां स्वेदतः प्रभो ॥ ९ ॥
नानाकालक्रमेणैव नानाकर्मप्रणोदितम् ।
इदमेव सुनिष्पन्नं परं ब्रह्म परात्परम् ॥ १० ॥
चराचरमिदं विश्वं स्थित्युत्पत्तिविनाशकृत् ।
स एव भगवान् कालः सर्वात्मा जगदीश्वरः ॥ ११ ॥
स्थित्युत्पत्तिकरा देवी परा भगवती हि सा ।
तयेदं वासितं विश्वं भुवनत्रयचराचरम् ॥ १२ ॥
केन कर्मविपाकेन कस्य केनापि मित्रवान् ।
ऋणवैरवशादेव अवतीर्णो जनः पुरा ॥ १३ ॥
पुत्रमित्रकलत्राद्याः स्वजनाः सर्वसंगताः ।
नानाकर्मवशादेव स्वश्वशालस्वसाथव वा ॥ १४ ॥
बन्धवो रिपवो मित्राः कुटुम्बऋणवैरगाः ।
ते सर्वे यद्वशाः स्वामिन् तादृशाः कथ्यतां मम ॥ १५ ॥
अथवापि पशूनां च पक्षिणां विलवासिनाम् ।
सरीसृपाणां जन्तूनां नानाभूमिनिवासिनाम् ॥ १६ ॥
कथयस्व दिवानाथ लोकानां हितकाम्यया ।
त्वं सर्वदेवदेवानां पुराणपुरुषोत्तमः ॥ १७ ॥

श्रीसूर्य उवाच ।

सर्वं कालक्रमेणैव कालात्मा क्रियते विभुः ।
भावयति सर्वभूतानां नानाकर्मभुजामपि ॥

6B, इति श्रीहोराप्रकाशे ज्ञानसमूहदीपके रविविरचिते लग्नविचारो नाम प्रथमोऽध्यायः।

14B, इति श्रीहोराप्रकाशे रविविरचिते रोमकनगरे यवनपदव्यां प्राप्ते जन्मजातिप्रकाश इहलोकप्रकाशः समाप्तस्तृतीयोऽध्यायः।

25B, इति श्रीहोराप्रकाशे रविविरचिते सारसिद्धान्ते रोमकनगरे यवनपदव्यां प्राप्ते बन्धुवर्गे सत्यकौतुके सर्वजीवकर्मप्रकाशके कथितमिदं प्रकरणं चतुर्थम्।

29A, श्री॰सत्यकौतुके प्रकरणं पञ्चमम्।

33A, इति श्रीहोराप्रकाशे रविविरचिते ज्ञानसमूहदीपके रोमकनगरे यवनपदव्यां प्राप्ते प्रातिवेश्माकारकज्ञानसूचके कथितमिदं प्रकरणं षष्ठम्।

38A, इति श्रीहोराप्रकाशे रविविरचिते स्वजनार्थसत्यकौतुके ज्ञानदीपके रोमकनगरे यवनपदव्यां प्राप्ते प्रकरणं सप्तमम्।

46B, इति श्रीहोराप्रकाशे रविविरचिते सारसिद्धान्ते रोमक॰ सर्वजीवकर्मज्ञाने इहलोकतत्कालसूचकदीपके प्रकरणमष्टमम्।

51A, इति श्री॰ बन्धुवर्गसत्यकौतुके सर्वजीवकर्मप्रकाशे कथितमिदं प्रकरणं नवमम्।

Last Colophon :

इति होराप्रकाशे रवि॰ बन्धुवर्गसत्यकौतुके प्रकरणं दशमम्।

Post-colophon :

संवत् १६६० वर्षे आषाढमासे कृष्णपक्षे १३ रविदिने।

For another part of the work see our No. 1785.

7357.

1785. होराप्रकाशः ज्ञानसमूहदीपकः ।

Horāprakāśa Jñānasamūhadīpaka.

Substance, country-made paper. 10 × 5½ inches. Folia, 35. Lines, 16, 17 on a page. Extent in ślokas, 1,200. Character, Nāgara. Date, (?). Appearance, tolerable.

Colophons :

1B, इति श्रीहोराप्रकाशे ज्ञानसमुहदिवके इष्ट प्रत्यक्षसुचक्रे द्वाविंशोऽध्यायः ।

4A, इति श्रीहोराप्रकाशे अपत्याधिकारः ।

5A, इति होराप्रकाशे रविविरचिते सारसिद्धान्ते रोमकनगरे यवनपदव्यां प्राप्ते इष्ट प्रत्यक्षसूचके लग्नफलम् ।

6A, ० मृतपुत्रत्वे प्रायश्चित्ताध्यायः ।

7A, ०मृतापत्यत्वे प्रायश्चित्तोऽध्यायः ।

8B, ०अपत्याधिकारे ३५ अध्यायः ।

11B, ०पांडुरोगाध्यायः ।

12, (written on one side) ३८ अध्यायः ।

15B, ०मृतापत्यत्वकर्मप्रकाशोऽध्यायः ।

17B, ०मृतापत्याधिकारे पंचमोऽध्यायः ।

16B, ०मृतापत्याधिकारप्रायश्चित्तः ।

18A, ०मृतापत्यत्वकर्मप्रकाश ३८ अध्यायः ।

18B, ० गर्भपातेषुपत्तौ न पत्यत्व कर्मप्रकाशः ६० ध्यायः ।

19B, ०अन्यपत्याधिकारप्रायश्चित्ताध्यायः ५७ समाप्तः ।

20B, ०भार्याया अनपत्यकर्मप्रकाश अष्टमोऽध्यायः ।

21B, ०इति श्रीहोराप्रकाशे अपत्याधिकारे प्रायश्चित्ताध्यायः ।

22B, ०पञ्चदशमोऽध्यायः ।

23A, ०होराप्रकाशिके अपत्याधिकारे प्रायश्चित्तोऽध्यायः ।

23B, ०यवनयातिप्रकाशदशमोऽध्यायः ।

24B, ०एकविंशमोऽध्यायः ।

25B, ०पञ्चमोऽध्यायः ।

26B, ०एकपुत्रपुत्रवतीस्त्रीआत्मघातकर्मप्रकाशप्रायश्चित्ता-ध्यायः ।

27A, इति श्रीहोराप्रकाशे प्रथमोऽध्यायः ।

28A, इति श्रीहोराप्रकाशे रविविरचिते सारसिद्धान्ते रोमकनगरे यवनपदव्यां प्राप्ते इह प्रत्यक्षसूचके कन्यालग्नविचारः ॥ ३५ अध्यायः ॥

29A, ०तृतीयांशविचारः ।

31A, इति श्रीहोराप्रकाशे ज्ञानसमूहदीपके रवि० अनपत्याधिकारे मृतपुत्रत्वे प्रायश्चित्ताध्यायः ॥ ५७ ॥

31B, इति श्रीहोराप्रकाशे पुत्राशुभानन्तरं ३२ ध्यायः ॥ श्रीः ॥

32A, इति श्रीहोराप्रकाशिके नेत्ररोगाध्यायः ।

33A, इति श्रीहोराप्रकाशिके अपत्याधिकारे प्रायश्चित्ता-ध्याय ॥ ३५ ॥

34A, इति श्रीहोराप्रकाशे अपत्याधिकारः ॥ ३६ ध्यायः ॥

34B, इति श्रीहोराप्रकाशे० पञ्चषष्ठितमोऽध्यायः ।

35A, इति श्रीहोराप्रकाशे ज्ञानसमूहदीपके यवनपदव्यां प्राप्ते श्रीसूर्यारुणसंवादे बन्ध्योच्छेदोत्तारायां ह्यधिकारप्रकाश ६८ अध्यायः । (?)

It begins :

तमोहाद्विजगन्नाथ सर्वकर्मसुसाक्षिणा ।
किमिदं सर्वजीवानां ज्ञानं श्रुतिसमन्विदम् ॥

श्रीसूर्योवाच ।

नारि वा पुरुषो वापि भुंजते कर्मणः फलम् ।
तथैवाहं प्रवक्ष्यामि गर्गाद्या श्रुतिसंश्रयात् ॥

दृष्ट्वा पुत्र नराणां वै नारिणां च यथा ध्रुवम् ।
पापजं पुण्यजं वत्स + + + + + + ॥
एक एकश्च तं पापं पुराभिर्बहुभिर्जनैः ।
तथैव पुण्यपापानां भुञ्जते कर्मणेरिताः ॥
अतिसुक्ष्मतरं ज्ञानं नानाजन्तुभयार्णवम् ।
+ + योगसमास + दृष्ट्वा घे + वरः प्रभोः ॥
मया ख्याता पुरा होरा जन्तुकर्मप्रकाशीका ।
येन विज्ञानमात्रेण त्रिकालो + + ज्ञानिनाम् ॥
सोयं योग दृष्ट्वा स्वामिन् कर्मणां हेतुपूर्वकम् ।
शुभांशे शुभलग्ने वा प्रश्नतत्कालसंभवम् ॥

It is a very corrupt and defective manuscript. It contains thirty-two chapters of *Horāprakāśa*, a work which is stated in the colophons to have been obtained in Ramaka, the country of Yavana (Rome). The colophons are full of blunders in numbering the chapters.

The chapters dwell upon expiations for those who give birth to short-lived issues, who are issueless, who have disorders of the eyes, who are suffering, in short, from diseases and mental agonies which come from unfavourable situation of planets.

7358.

6499. होरामकरन्दः । *Horāmakaranda.*

Being a work on horoscopy in 31 adhyāyas by Guṇākara.

Substance, country-made paper. 10 × 4½ inches. Folia, 74. Lines, 8 on a page. Extent in ślokas, 1,100. Character, Nāgara of the 18th century. Appearance, discoloured.

Last Colophon :

इति होरामकरन्दे गुणाकरविरचिते नष्टजातकाध्यायः एकत्रिंशः ।

Post-colophon :

शुभमस्तु ॥
वसती रौद्रके यस्य पुरे भूदेवसंकुले ।
तेनेदं कृष्णनाम्ना वै लिखितं पुस्तकं वरम् ॥
ज्योतिर्विद्रामस्य पुस्तकमिदम् । श्रीरस्तु ॥

For the beginning and the chapter-names of the work see IO. Catal. No. 3099.

The present manuscript has, at the end, an account of the author's family :

ग्रामोवन्तिविभूषणैकतिलकः सर्जूरनामाह्वयः
तस्मिन् सद्गुणकेलिसद्म समभूत् कौण्डिन्यगोत्रोद्भवः ।
श्रीनारायणसंज्ञको द्विजवरो विद्यावधूवल्लभः
श्रौतो येन विधिः कलौ कृतयुगोत्कर्षं परं प्रापितः ॥
तस्मादभूदमलसद्गुणरत्नसिन्धोः
श्रीश्रीपतिर्गणककैरवणीतरश्मिः ।
गोचक्रवालममलं सुमनश्चकोरा
यस्यानिशं श्रवणचञ्चुपुटैः पिबन्ति ॥
श्रीब्रह्मगुप्तार्यभटोत्पलाख्य-
वराहल्लेषु दिवं गतेषु ।
निराश्रया यं समवेक्ष्य वाणी
विलासवासं रचयाञ्चकार ॥
दृष्ट्वा यद्यशसेन्दुपादमहसा शुक्लं त्रिलोकीतलं
ज्योत्स्नापातधिया धयन्ति परितो मुग्धाश्चकोराङ्गनाः ।
तत्पुत्रेण गुणाकरेण गणकानन्देन्दुना जातकं
श्रीश्रीरामकरन्दसंज्ञमरचि ज्योतिर्विदां प्रीतये ॥

यदज्ञानाद्ग्रन्थे कुकृतमिह यद्बाल्यमतितो
विदोषं तत् कर्त्तुं स्वयमपि यतन्ते सुमनसः ।
विनाशे दोषाणामभिलषति या प्रातसविता(?)
न पर्जन्यः सम्यक् सजनपदनिदाघक्षयकृते ॥

According to Prof. Bhandarkar, Rep. 1882-83, p. 30, the work is quoted in Keśava's *Jātakapaddhati*.

Printed and published by the Chowkhamba Sanskrit Series.

7359.

6554A. होरारत्नः । *Horāratna.*

By the same author.

Substance, country-made paper. 10 × 4¼ inches. Folia, 1–77. Lines, 9 on a page. Character, Nāgara of the 18th century. Appearance, old, discoloured and worm-eaten. A mere fragment.

Printed and published by the Chowkhamba Sanskrit Series.

7360.

6554. होरारत्नः । *Horāratna.*

By Balabhadra, son of Dāmodara (a commentator on Bhāskara's work), son of Caturbhuja Miśra, son of Nārāyaṇa (whose elder brother's name was Khemakarṇa), son of Devīdāsa (a commentator on Śrīpatipaddhati), son of Lāla of Kānyakubja, of the Bhāradvāja family.

Substance, country-made paper. 13 × 5 inches. Folia, 126. Lines, 11 on a page. Character, Nāgara of the 18th century. Appearance, discoloured. Incomplete at the end.

A treatise on horoscopy in 31 chapters. The author wrote also *Varṣaratna* and a commentary on *Bījagaṇita.*

For a description of the work see Peters, Rep. IV, Extr. 63.

The last colophon in the incomplete manuscript:

100B, इति श्रीमद्दैवज्ञवर्यपण्डितदामोदरात्मजबलभद्र-
विरचिते होरारत्ने नाभसयोगाध्यायः षष्ठः ।

Begins thus :

अथ होरारत्नं लिख्यते ।
होरापाथोनिधेः पारं दुःपारं तर्त्तुमिच्छति ।
मद्दागणपतेः शुण्डोऽवलम्बाय प्रजायताम् ॥ १ ॥
अस्ति श्रीमत्कान्यकुब्जाभिधानं
सद्विप्राणां सम्भवे यन्निदानम् ।
तत्रैवाभूत् श्रीभरद्वाजवंशे
श्रीमल्लालः कीर्त्तिविद्याविशालः ॥ २ ॥
तदात्मजोऽभूत् कृतिदेविदासो
विद्यारमाकीर्त्तिसुखैकवासः ।
सत्पद्धतौ श्रीपतिनिर्मितायां
व्यक्ते च टीकामकरोद्विचित्राम् ॥ ३ ॥
तस्मात्तघुज्योतिषशास्त्रविज्ञः
श्रीक्षेमकर्णः समभूद्विधिज्ञः ।
नारायणोऽभूच्च ततः कनिष्ठः
सर्पाधिपोक्तौ सुतरां पटिष्ठः ॥ ४ ॥
ततोऽभवन्मिश्रचतुर्भुजाख्यः
सतर्कवेदान्तविदग्रगण्यः ।
समस्तभूमिपतिलब्धमान-
श्रीरामभक्तो विठितैकतानः ॥ ५ ॥

ततोऽभवद्भूपसभाख्नेयः
कर्त्ता च दामोदरनामधेयः।
श्रीभास्करोक्तीव करोम्मनोज्ञां
टीकामपूर्वां बुधवृन्दभोग्याम्॥ ६॥
दामोदरस्य पुत्त्रौ जातौ बलभद्रश्च हरिरामौ।
बलभद्रेण कृत प्राक् सरासनटिप्पनं च मकरन्दे॥ ७॥
ततश्टिप्पनं भास्करीये च वीजे
कृतं ताजिके वर्ष रत्नन्त्वपूर्वं।
गुरोपादयो प्रसादात्मतो
जातकसन्निवद्धं करोमि॥

7361.

10536. **होराषट्पञ्चाशिकावृत्तिः।** *Horāṣaṭpañcāśikāvṛtti.*

The text by Pṛthuyaśas, the son of Varāhamihira, and the commentary by Bhaṭṭa Utpala.

Substance, country-made paper. 10×5 inches. Folia, 36. Lines, 9 on a page. Extent in ślokas, 650. Character, Nāgara of the 19th century. Appearance, fresh.

Colophon of the commentary :

इति भट्टोत्पलविरचितायां षट्पञ्चाशिकावृत्तौ मिश्रकाध्यायः समाप्तः।

Post-colophon :

अथ श्लोकानुक्रमणिका लिख्यते देवतानमस्कारं, केन्द्रादिविचारः २। द्वादश-भावशुभाशुभं ३। लाभादौ शुभाशुभं ४। नष्टलाभः ५। हृतनष्टमुष्टिगतानां धातुमूलजीवं ६। ७। इति होराध्यायः, गमागमाध्यायः, स्थानवृद्धिगमागमा-ध्यायः स्थानवृद्धिगमागमजीवितमरणरोगशान्तिपराभिभवं ८। ९। शत्रोसम्मार्ग-निवृत्तिः १०। ११। अध्वयायिनां शुभाशुभं १२। शत्रोरपि गमागमं १३।

शत्रुनिवृत्तिः १४। गमागमनं १५। १६। १७। १८। १९। २०। धातुनिवृत्तिः २१। २२। २३। शत्रोरागमनदिनप्रमाणम् २४। इति गमागमाध्यायः, जयपराजयाध्यायः २५। नागरयाने कस्य विजयो भवति। २६ सन्धिविरोधः २७। २८। २९। इति जयपराजयाध्यायः शुभाशुभलक्षणाध्यायः शुभाशुभं ३०। लाभालाभं ३१। ३२। शुभाशुभं ३३। रोगार्त्तस्य शुभाशुभं ३४। इति शुभलक्षणाध्यायः प्रवासचिन्ताध्यायः आगमनं ३५। ३६। ३७। ३८। प्रवासिन आगमने कालः ३९। इति प्रवासचिन्ताध्यायः। नष्टप्राप्ताध्यायः चौरं ४०। स्थानं ४१। लाभालाभं ४२। दिगध्वनः प्रमाणं ४३। इति नष्टप्राप्त्यध्यायः। ६। मिश्रकाध्यायः। गर्भिण्याः पुत्रकन्याध्यायः। वरस्य स्त्रीलाभालाभज्ञानं ४४। विवाहज्ञानं ४५। वर्षासमये वृष्टि ४६। ४७। गर्भिन्याः किं जातमिति ४८। प्रष्टुः किदृशी स्त्री चेतसि वर्त्तते ४९। प्रष्टा पृच्छति कस्य सम्बन्धिनी चिन्ता मम मनसि वर्त्तते ५०। ५१। प्रवासचिन्ता ५२। प्रष्टा पृच्छति कीदृश्याः स्त्रिया सह सम्भोगः ५३। रोगार्त्तस्य परदेशस्थितस्य मृत्युः ५४। कश्चित् पृच्छति मम पिता अन्यदेशस्थः तत्र किं अद्यापि तिष्ठति अन्यथा देशान्तरं गत इति ५५। हृतस्यार्थस्य स्वरूपं तास्करकालदिग्देशतस्करवयोवर्णज्ञानम् ५६। इति मिश्रकाध्यायः इति श्लोकानुक्रमणिका समाप्ता शुभमस्तु।

Text begins :

प्रतिपद्य रविं मूर्ध्ना वराहमिहिरात्मजेन पृथुयशसा।
प्रश्ने कृतार्थगहना परार्थमुद्दिश्य सत् यशसा॥

Commentary begins :

अथ षट्पञ्चाशिका प्रारम्भः।

केशाजार्कनिशाकरक्षितिजवित् जीवास्फुजित् सूर्यजां
विघ्नेशं स्वगुरुं प्रणम्य शिरसा देवीञ्च वागीश्वरीम्।
प्रश्नज्ञानविधौ वराहमिहिरापत्यस्य सद्बुद्धिमान्
लोकानां हितकाम्यया द्विजवरो टीकां करोत्युत्पलः॥

प्रश्नविद्यां स्वपद्यैः कर्तुकामः आदावेव भगवतः श्रीसूर्यस्य नमस्कारं स्वनामाख्यापनं चार्यया चाह श्लोकः प्रणिपत्य etc.

Printed and published by (1) the Chowkhamba Sanskrit Series, Benares, (2) the Venkateswara Press, Bombay.

7362.

2279. होराषट्पञ्चाशिका or simply षट्पञ्चाशिका ।

Horāṣaṭpañcāśikā or simply *Ṣaṭpañcāśikā.*

By Pṛthuyaśas, son of Varāhamihira, with the commentary by Dāmodara.

Substance, country-made paper. 12 × 5½ inches. Folia, 12. Lines, 10–13 on a page. In Tripāṭha form. Character, Nāgara. Date, (?). Appearance, fresh but worm-eaten. Complete.

Colophon of the text :

इति श्रीअवन्तिकाचार्यवराहमिहिरात्मजपृथुयशोऽभिधानेन विरचितायां षट्पञ्चाशिकायां सप्तमोऽध्यायः ।

Colophon of the commentary :

इति श्रीदामोदरदेवविरचितायां षट्पञ्चाशिकायां सप्तमोऽध्यायः ७ समाप्तोऽयं ग्रन्थः ।

For the text see IO. Catal. No. 2992.

The commentary begins :

मणिकर्णिकृतावासं नत्वा सिद्धिविनायकम् ।
अमीश्वरकृतावासदामोदरविनिर्मिता ॥
वराहसुत देवस्येयं प्रकाशिका ।
सिद्धान्तज्ञैः सुगणकैर्दृष्ट्वा शिवतुष्टये ॥

अथेह वराहमिहिराचार्यात्मजः प्रश्नं विवक्षुरादौ निर्विघ्नतापरिसमाप्त्यर्थं मङ्गलं कृत्वा संबंधाद्यनुबंधचतुष्टयमाह प्रणिपत्येति ।

The parentage of the commentator :

जानकीरघुनाथाभ्यां जातो दामोदरः क्रती ।
तेनेयं रचिता टीका सुप्रश्नस्य प्रकाशिका ॥

It ends :

नवबाणादयमितो खतुष्टुव्वत्तसंख्यया ।
नामिक्रमेण लिखितो मया खनव(वं) विश्रुभिः ॥

7363.

10027. **होराषट्पञ्चाशिका ।** *Horāṣaṭpañcāśikā.*

By Pṛthuyaśaḥ.

With the commentary by Dāmodara.

Substance, country-made paper. 12×5 inches. Folia, 15. In Tri-
itha form. Character, Nāgara. Date, Saṃvat 1865. Appearance,
ecayed and repaired. Complete.

Last Colophon :

(Text) :

इति श्रीअवन्तिकाचार्यवराहमिहिरात्मजपृथुयशसा (यमिला-
तेन) विरचितायां षट्पञ्चाशिकायां सप्तमोऽध्यायः ।

(Commentary) :

इति श्रीदामोदरविरचितायां षट्पञ्चाशिका [प्रकाशिका]यां
सप्तमोऽध्यायः ।

Post-colophon :

संवत् १८६५ माघमासे शुक्लपक्षे तिथौ ३ गुरुवासरे लिखितं
रामेश्वरस्वपठनार्थम् ।

The commentary begins :

मणिकर्णीकृतावासं नत्वा सिद्धिविनायकम् ।
अमीश्वरकृतावासदामोदरविनिर्मिता ॥

वाराहसुतदैवज्ञप्रश्नस्येयं प्रकाशिका ।
सिद्धान्तज्ञैः सुगणकैर्द्रष्टव्या शिवतुष्टये ॥

The commentary ends :

जानकीरघुनाथाभ्यां जातो दामोदराकृतिः ।
तेनेयं रचिता टीका सुप्रश्नस्य प्रकाशिका ॥
नवबाणद्वयमितो ह्यनुष्टुप्शतसंख्यया ।
नाभिक्रमेण लिखितोऽन्यथा खननविष्णुभिः (?) ॥

7364.

10540. (होरा)षट्पञ्चाशत्प्रश्नहोराटीका ।

(Horā)ṣaṭpañcāśatpraśnahorāṭīkā.

By Śrīdhara.

Substance, country-made paper. 11 × 5 inches. Folia, 11–37. Lines, 10 on a page. Character, Nāgara of the 19th century. Appearance, fresh. Incomplete at both ends.

The text (commonly called होराषट्पञ्चाशिका or simply पञ्चाशिका) by Pṛthuyaśas is well known. The commentary is a new one.

14A, इति श्रीपृथुयशःकृतषट्पञ्चाशत्प्रश्नशास्त्रे श्रीधरविरचितटीकायां शत्रोरागमनाध्यायो द्वितीयः; 16B, इति श्रीषट्पञ्चाशत्प्रश्नशास्त्रे जयापजयो नाम तृतीयोऽध्यायः; 18B, इति श्रीषट्पञ्चाशत्प्रश्नहोराशास्त्रे शुभाशुभयोगो नाम चतुर्थोऽध्यायः; 21B, इति श्रीषट्पञ्चाशद्ग्रन्थे प्रवासि-आगमनं पञ्चमोऽध्यायः; 25B, इति श्रीपृथुयशःकृत(सुत) कृपन्न प्रश्नहोराशास्त्रस्य श्रीधरविरचितटीकायां नष्टप्राप्तिर्नाम षष्ठोऽध्यायः; 27B, इति पृथयशःकृतषट्पञ्चाशद्ग्रन्थे स्त्रीपुरुष-लाभालाभाध्यायो सप्तमः; 28B, ०षट्पञ्चाशत्प्रश्नशास्त्रे वर्षप्रश्नाध्यायोऽष्टमः; 32B, ०षट्पञ्चाशत् होराशास्त्रे सुरताध्यायो नवमः ।

7365.

6590. **होराषट्पञ्चाशिका।** *Horāṣaṭpañcāśikā.*

By Pṛthuyaśas, son of Varāhamihira.

With an anonymous commentary.

Substance, country-made paper. 16½ x 5½ inches. Folia, 7. In Tripāṭha form. Character, Bengali. Date, Śaka 1704. Appearance, fresh. Complete.

Last Colophon of the text :

इति मिश्रकाध्यायः समाप्तः।

The commentary has no colophon.

Post-colophon :

इति ९ आश्विन शकाब्दाः १७०४। श्रीश्रीगोपालाय नमः।

The commentary begins :

ॐ नमः शिवाय॥

पृथुयशोनाम्ना प्रश्न(स्न)विषये इयमर्थेन गहना प्रश्नषट्-पञ्चाशिकात्मिका विद्या छात्रादीनां प्रयोजनमुद्दिश्य कृता शोभनं कीर्त्तिलक्षणं यस्या॥ १॥

केन्द्रस्थानपरिभाषामाह। स्थानपरिभ्रंशः दृष्टे चतुर्ण भवतीति अविभ्रंशः चतुर्थस्थानात् वृद्धिः मध्याद् दशमस्थानादस्तमयात् सप्तमस्थानात् प्रवासिव सेवनपश्यन् किं करोति वर्त्तनं कथमे[त]त् इत्युच्यते चरस्थिरद्व्यात्मके यदुक्तं चरराशौ गते स्वामिना युक्ते दृष्टे च शुभग्रहाणामन्यतमेन च प्रयुक्तेऽन्यथा भवतीति॥ २॥

End :

कर्कटवृश्चिक-मीनैरुत्तरस्यां गतमिति वाच्यं। देशो यथा पृच्छा-काले मेषलग्ने पशुदेशे स्थितं वाच्यं। वृषे गोष्ठे मिथुने नृत्यगीत-संग्रामादौ। कर्कटजलसमीपे। सिंहे अरण्ये। कन्यायां

नौसमीपे। तुलायां बाटे रणे वा। वृश्चिके चौरभूमौ। धनुषि संग्रामे ॥ ० ॥

The text is often printed and often noticed.

7366.

10025. होराषट्पञ्चाशिका। *Horāṣatpañcāśikā.*

By Pṛthuyaśa, son of Varāhamihira.

With a Hindi commentary by Narmadā Giri.

Substance, country-made paper. 13 × 5 inches. Two batches of leaves: I. 11 × 4 inches; II. 13 × 5 inches. I contains, in 11 leaves, the first adhyāya with its commentary. II, in 37 leaves, contains the adhyāyas 2–7, with their commentary. Character, Nāgara. Date, Saṃvat 1912.

I.

इति श्रीनर्मदागिरिणा अवधूतेन कृतायां बालबोधिन्यां षट्पञ्चाशिकाटीकायां संज्ञेपहोराध्यायः प्रथमः ॥

II.

Folia 10 and 21 missing.

9A, ०गमागमाध्यायो द्वितीयः।

13B, ०जयपराजयाध्यायस्तृतीयः।

16B, ०शुभाशुभलक्षणाध्यायश्चतुर्थः।

20A, ०प्रवासचिन्ताध्यायः पञ्चमः।

23B, ०नष्टप्राप्त्यध्यायः षष्ठः।

Last Colophon :

मिश्रकाध्यायः सप्तमः ॥

Post-colophon :

संवत् १९१२ चैत्रमासे कृष्णपक्षे दशम्यां तिथौ चन्द्रवासरे इदं पुस्तकं समाप्तमगात् ॥

7367.

10342. होराषट्पञ्चाशिकासूत्रम् ।

Horāṣaṭpañcāśikāsūtra.

By Pṛthuyaśas.

Substance, country-made paper. 9 × 4 inches. Folia, 7. Lines, 7, 8 on a page. Character, Nāgara. Date, Saṃvat 1786. Appearance, old and discoloured. Complete.

Colophon :

इति श्रीभट्टोत्पलविरचितायां षट्पञ्चाशिकासूत्रं समाप्तम् ॥ १ ॥

Post-colophon :

शुभं भवतु ॥ संवत् १७८६ वर्षे शाके १६५१ ॥ समये नाम वैशाखे शुक्ले पक्षे ॥ मन्दवासरे ॥

लिपिकृतं ब्राह्मण+रजौ । ताराढं॰ ।

On the reverse of the last leaf नीलकण्ठस्य पुस्तकम् । The same occurs also on the obverse of the first leaf.

7368.

9315. होराषट्पञ्चाशिका । *Horāṣaṭpañcāśikā.*

Substance, country-made paper. 9 × 4 inches. Folia, 7. Lines, 8 on a page. Extent in ślokas, 84. Character, Nāgara. Date, (?). Appearance, tolerable. Verse. Generally correct. Complete.

The last colophon runs thus :

इति श्रीभट्टोत्पलविरचितायां होराषट्पञ्चाशिकायां मिश्रकाध्यायः ।

7369.

4304. **होराषट्पञ्चाशिका** *or* **ज्योतिषषट्पञ्चाशिका ।**

Horāṣaṭpañcāśikā or *Jyotiṣaṣaṭpañcāśikā.*

By Pṛthuyaśas, son of Varāhamihira.

Substance, country-made paper. 10 × 5 inches. Folia, 3. Lines, 15 on a page. Extent in ślokas, 100. Character, Nāgara of the 18th century. Appearance, discoloured. Complete.

A well-known work of astrology. See IO. Catal. No. 2992.

7370.

7864. **होराषट्पञ्चाशिका ।** *Horāṣaṭpañcāśikā.*

By Pṛthuyaśas, son of Varāhamihira.

Substance, country-made paper. 9 × 5 inches. Folia, 6. Lines, 10 on a page. Character, Nāgara. Date, Saṃvat 1868. Appearance, discoloured. Complete.

Colophon :

इति श्रीवराहमिहिरात्मजेन विरचिता षट्पंचाशि[का] संपूर्णा ।

Post-colophon :

संवत् १८६८ वैशाख सुदि १५ बुधवासरे । शुभं ददातु ।

7371.

7821. **होराषट्पञ्चाशिका ।** *Horāṣaṭpañcāśikā.*

By Pṛthuyaśas.

With Bhaṭṭotpala's commentary.

Substance, country-made paper. 10¾ × 4½ inches. Folia, 31. Lines, 8 on a page. Extent in ślokas, 425. Character, modern Nāgara. Appearance, fresh. Complete.

Last Colophon :

इति श्रीभट्टोत्पलविरचितायां षट्पञ्चाशिकावृत्तौ मिश्रकाध्यायः सप्तमोऽध्यायः समाप्तः ।

Post-colophon :

वैशाखमासे सिते पक्षे प्रतिपत्शनिवासरे ।
पञ्चकोशे च पूर्वं स्यात् पुस्तकं लिखितं मया ॥
संपूर्णा सुभमस्तु० ।

See IO. Catal. Nos. 2992 and 2994 respectively for the xt and the commentary.

7372.

8177. **होराषट्पञ्चाशिका ।** *Horāṣaṭpañcāśikā.*

By Pṛthuyaśas.

With Bhaṭṭotpala's commentary.

Substance, country-made paper. 9 × 5½ inches. Folia, 20. In Triha form. Character, Nāgara of the 17th century. Appearance, disured. Complete.

The commentary begins thus :

कालेशार्कनिशाकरक्षितिजविज्जीवस्फुजित्सूर्यजान्
विघ्नेशं च गुरून् प्रणम्य शिरसा देवीं च वागीश्वरीम् ।
प्रश्नज्ञानविधौ वराहमिहिरापत्यस्य सत्प्रत्यये
शिष्याणां हितकाम्यया द्विजवरष्टीकां करोत्युत्पलः ॥ १ ॥
कानीह शास्त्रे सम्बन्धाभिधेयप्रयोजनानि भवन्तीत्युच्यते ।
ब्रह्मादिनिःसृतमिदं वेदांगमिमिति । उपायो ये च लक्षणो
वाच्यवाचकलक्षणो वा संबन्धनुपायः etc. etc.

Text begins thus :

प्रणिपत्य रविं मुर्घ्ना वराहमिहिरात्मजेन सद्यशसा ।
प्रश्ने कृतार्थगहना परार्थमुद्दिश्य पृथुयशसा ॥ १ ॥

च्युतिर्विलग्नाद्धिबुकाच्च वृद्धिर्मध्यात्प्रवासोऽस्तमयान्निवृत्तिः ।
वाच्यं ग्रहैः प्रश्नविलग्नकाद्दृष्टं प्रविष्टो हिबुके प्रवासी ॥ २ ॥

Text ends thus :

अंशकाद् ज्ञायते द्रव्यं द्रेष्काणे तस्कराः स्मृताः ।
राशिभ्यः कालदिग्देशा वयोजातिश्च लग्नपात् ॥

7373.

10847. होराशास्त्रम् । *Horāśāstra.*

Being an interlocution between Sūrya and Aruṇa.

Substance, Nepalese paper. 12 × 3½ inches. Folia, 14. Lines, 6 on a page. Extent in ślokas, 252. Character, Newari of the 19th century. Appearance, discoloured. Complete.

Beginning :

श्रीमद्गणपतये नमः ॥ श्रीसूर्याय नमः ॥

अरुण उवाच ।

इह जन्मान्तरे स्वामिन् पित्रादीनां कथं भवेत् ।
सुखदुःखैर्व्याधिभिः पुत्रै बन्धुवावंधुते ब्रवन् ॥

Last Colophon :

इति श्रीसूर्यारुणसंवादे होराशास्त्रे द्वादशभवनफलं संपूर्णं ।

The MS. is hopelessly incorrect and cannot be properly described.

Printed and published by the Chowkhamba Sanskrit Series.

7374.

1603. होरासारः । *Horāsāra.*

Substance, country-made paper. 11½ × 4 inches. Folia, 52. Lines, 1 on a page. Extent in ślokas, 1,400. Character, Nāgara. Date, Saṃvat 1865. Appearance, tolerable. Generally correct.

Post-colophon :

श्रीः पुस्तकमिदं . . . . स्य ज्योतिर्वित् ।

लोलस्वान्तोऽत्यन्तसंजातकायः

चश्वत्देहस्वेहस्तन्मित्रवर्गे ।

मस्यैरम्भः सप्रसंभवै पुरुसदंभः (?)

कुंभस्वेत्यात्संभवे यस्य लग्नम् ॥

संवत्-१८६५ शाके १७३० मीतीफाल्गुणशुक्ले चतुर्थी शनिवार

श्री ।

It begins as in Bik. No. 639 :

जयन्ति जगदेकहेतुर्विश्वात्मा लोकप्रियकरः ।

अनु(भु)दिनमुदयविनाशस्थितिकर्ता भास्करो दिनाधीशः ॥

निमिषादिव वत्सरान्तं कालं राशिप्रयाणमेकैकम् ।

गणितस्कन्धे प्रोक्तं पूर्वं ग्रहचारलक्षणैः सार्द्धम् ॥

होरास्कन्धे सम्यग्दशाविभागं पुरा विनिर्दिष्टम् ।

विस्तारशास्त्रमानैः नाशक्यते मन्दबुद्धिभिर्ज्ञातुम् ॥

तस्मात्प्रयोगसिद्धिराचार्यैर्यत्फलं सुसिद्धम् ।

तदिस्पष्टार्थं वक्ष्ये होराशास्त्रार्णवे सारम् ॥

मेषवृषमिथुनकर्कटकाः सिंहकन्यातुलावृश्चिकास्या ।

धनुरिह मकरकुम्भ-मीना इति राशिनामानि ॥

Colophons :

No colophon for the 1st chapter.

3B, इति होरासारे ग्रहलक्षणं नाम द्वितीयोऽध्यायः ।

5A, ०ग्रहबलनिरूपणाध्यायस्तृतीयः ।

6A, ०निषेकजन्माध्यायः चतुर्थः ।

6A, ०सद्यमरणयोगाध्यायः पञ्चमः ।

10B, ०योगायु(ता)ज्ञानाध्यायः षष्ठः ।

13B, ०आयुर्दायविधानं नाम सप्तमोऽध्यायः।

14B, ०दशाफलाध्यायोऽष्टमः।

15B, ०सूर्यदशाफलज्ञानाध्यायः नवमः।

17A, ०चन्द्रदशाफलाध्यायो दशमः।

18A, ०भौमदशाध्याय एकादशः।

19A, ०बुधदशाफलज्ञानं द्वादशः।

20A, ०जीवदशाफल त्रयोदशाध्यायः।

21A, ०शुक्रदशाफलं चतुर्दशाध्यायः।

22A, ०शनिदशाफलं पञ्चदशाध्यायः।

23B, ०प्रकीर्णाध्यायः षोडशः।

28A, ०अष्टवर्गदशाफलज्ञानाध्याः सप्तदशः।

31A, ०अन्तर्दशा अष्टादशोऽध्यायः।

33B, ०योगायोग एकोनविंशत्तमः।

35A, ०(राजयोगः) विंशतितमोऽध्यायः।

37A, ०भावफलाध्यायः एकविंशतिः।

37B, ०कर्माजीवाध्यायो द्वाविंशतिमः॥

39A, ०विशेषयोगफलाध्यायः।

41B, ०दोषाध्यायश्चतुर्विंशत्तमः।

43A, ०स्त्रीजातकम्।

46A, ०निर्वाणाध्यायः षड्विंशः।

47B, ०नष्टजातकाध्यायः। २७।

48B, ०नक्षत्रपुरुषलक्षणाध्यायः। २८।

50A, ०राशिपुरुषलक्षणाध्यायः। २९।

51A, ०नवांशफलं। ३०।

52A, ०नक्षत्रजातकनिरूपणाध्याय एकत्रिंशत्तमः।

Authorities consulted :

Leaf 10B.

आह—

मययवनसिद्धसेनप्रबोधमाण्डव्यविष्णुगुप्ताद्यैः ।
आयुर्दायविभागो नृणां सम्यक् पुरातनैः कथितः ॥

7375.

10404. **होरासारसुधानिधिः ।** *Horāsārasudhānidhi.*

By Nārāyaṇa, son of Sāmudrika Mādhava.

Substance, country-made paper. 12 × 5½ inches. Folia, 17. Lines, 11 on a page. Extent in ślokas, 600. Character, Nāgara of the 18th century. Appearance, discoloured.

A work on horoscopy.

Beginning :

श्रीगणेशाय नमः ॥

श्रीशाद्यैः सहितं गजेन्द्रवदनं श्रीशारदालङ्कृतं
पाशं सोदकपूर्णमोदककलसं पाशाङ्कुशं भुजैः ।
बिभ्राणं शुचिनागसम्भवलसत्कायं सहस्रार्कभं
वन्दे मूषकवाहनं गणपतिं त्रैलोक्यचिन्तामणिम् ॥
श्रीरामोद्भवकश्यपान्वयनिधिः सामुद्रिकज्ञः सुधीः
श्रीमान् माधवसंज्ञको द्विजवरो विश्वेशसेवारतः ।
दादाभाङ्कृति तस्मादजनि गुणगणैः पूजितस्तत्त्ववेत्ता
सिद्धान्तानां च + + मुनिजनविदितस्तत्समः कोऽपि नान्यः ॥ २ ॥
तस्माल्लब्धवरानुजोऽल्पमतिमान् नारायणोऽहं ब्रुवे
होरासारसुधानिधिं गणितविच्छ्रेष्ठैः चमत्कारिकम् ।
श्रीगर्गादिमतादिशिष्टमखिलं संगृह्य सारं परं
यस्य ज्ञानलवेन मोक्षपदवीं प्राप्नोति निःसंशयम् ॥ ३ ॥

राशिव्योमगयोनिभेदकथनं व्यक्तिर्वियोनेस्तथा
धानं जन्मतदिष्टरिष्टविविधायुः खेचराणां दशा ।
तद्भादष्टकवर्गयोगकलनं भूपालयोगादिकं
सर्वं यत्र निगद्यते तनुभृतां स्कन्धः स होराभिधः ॥ ४ ॥
आद्यन्तवर्णलोपाद्धोरास्माकं भवत्यहोरात्रात् ।
तत्प्रतिबद्धः सर्वो ग्रहभगणश्चिन्त्यते यस्मात् ॥ ५ ॥
यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पंक्तिम् ।
व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ॥ ६ ॥

4A, इति श्रीहोरासारसुधानिधौ राशिप्रभेदाध्यायः; 6B, इति श्रीश्रीग्रामकग्रेप(?) नामकमाधवात्मजनारायणकृते होरासारसुधानिधौ ग्रह-योनिभेदग्रहदानाध्यायः; 8A, इति सामुद्रिकोपनामकनारायणकृते निषेका-ध्यायः; 10A, [सामु]द्रिकोपनामकनारायणकृते होरासारसुधानिधौ सूतिका-ध्यायः; 12A, इति श्रीहोरासारसुधानिधौ मातृपितृरिष्टाध्यायः; 17, इति श्रीसामुद्रिकोपनामकमाधवात्मजनारायणकृते होरासारसुधानिधौ अनिष्टाध्यायः अथ दीर्घायुर्योगः—the MS. is left incomplete.

MISCELLANEOUS.

7376.

2782.

Substance, country-made paper. 13 × 5 inches. Folia, 5. Lines, 10 on a page. Extent in ślokas, 83. Character, Nāgara of the 17th century. Appearance, fresh.

It begins :

शन्यर्कराहुकेत्वाराः क्रूराः शेषाः शुभग्रहाः ।
क्रूरयुक्तो बुधः क्रूरः क्षीणचन्द्रस्तथैव च ॥

83rd verse :

वेधोवर्णादिके यावत् स्थानवेधोपि यावतः ।
दृष्टिस्तदनुमानेन वाच्या विंशोपका बुधैः ॥
एवं विंशोपका ।

7377.

8078.

Substance, country-made paper. $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 148. Lines, 9 on a page. Character, Nāgara. Date, Saṃvat 1836. Appearance, fresh. Complete.

A manual of horoscopy.

No colophon.

Post-colophon :

संवत् १८३६ वर्षे पोष वदि ७ दिने गुरुवारे ।

Begins thus :

श्रीगुरुभ्यो नमः ।

स्वस्ति श्रीऋद्धिवृद्धिर्जयो मङ्गलमभ्युदयोऽस्तु । विमलजन्मपत्रिकाप्रारम्भे सदारप्रासनयाकावाकु । स्वान्तकृतमङ्गलेनारब्धकर्मा समाप्यते । अग्रे राजयोगादीनि फलानि प्रची[णी]यन्ते । तत्रादौ व्योमचारविचारशास्त्रत्वात् । तन्नमस्कारात्मका मङ्गलामाचरामितिः ।

आदित्याद्या ग्रहा सर्वे नक्षत्राः सराशयः ।
सर्वान् कामान् प्रयच्छन्तु यस्येयं जन्मपत्रिका ॥
जम्भारातिभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणु-
रक्तास्तिक्तैरिवोघैरुदयः गिरिनदी धातुधाराद्रवस्य ।
आयान्त्या तुल्यकालं कमलबलरुचो वारुणा वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा चानवीया ॥ २ ॥

etc. etc. etc. etc.

Ends thus :

आयुर्द्रोणसुते श्रियं दशरथे शत्रुक्षयं राघवे
ऐश्वर्यं नहुषे गतिश्च पवने मानं च दुर्योधने ।
शौर्यं शान्तिववे(?) बलं हलधरे सत्यं च कुन्तीसुते
विज्ञतां विदुरे भवन्ति भवतां कीर्त्तिश्च नारायणे ॥ ३८ ॥
इति श्रीप्रशस्ति ।

Topics:

प्रशस्तिः। जन्मकुण्डली। फलानि। संवत्सरफलम्। युग-फलम्। गोलफलम्। अयनफलम्। ऋतुफलम्। मासफलम्। पक्षफलम्। तिथिफलम्। नक्षत्रफलम्। योगफलम्। करणफलम्। वर्गः। वर्गफलम्। योनिफलम्। राशिफलम्। etc. etc. etc.

7378.

10069.

Substance, country-made paper. 6 × 4½ inches. Folia, 21. Lines, 14 on a page. Extent in ślokas, 280. Character, Nāgara of the 18th century. Appearance, old and discoloured.

A metrical work on astrology with a Hindi commentary.

Beginning:

श्रीगणेशाय नमः।

स जयति सिन्दुरवदनो देवो यत्पादपङ्कजस्मरणात्।

दासरमणी च तमसां राशिं नाशयेद्विघ्नानाम्॥

न षष्ठी न च द्वादशी नाष्टमी नोसितासु।

तिथिपूर्णमास्यनुरक्ता॥ (?)

इयदिसमैर्चेंदुजीवांतश्चत्सग्नवो (?)

वाश्वरैरेव जात्रा प्रसक्ता॥ (?)

Topics:

2A, इति यात्रा; 2B, अथ प्रवेशः; 3A, अथ रोगिस्नानवर्ज्या; 4A, अथ विवाहार्थे कन्याशुभाशुभम्; 7A, इति वारप्रवृत्तिः; 14B, इति राहुचक्र; 16A, नवांशचक्र; 17B, सर्वाङ्गयोग; 18B, अथ चूलामुहूर्त्त; इति चुलाचक्र; 19A, अमृतसंजीवनीविद्याव्याख्यास्यं; आरजातिकश्लोक (end).

7379.

10588.

A work on horoscopy.

Substance, Nepalese paper. 10 × 4½ inches. Folia, 15–158. Lines, 9 on a page. Foll. 20, 21, 22, 33, 34, 52–55, 63, 64, 75, 77, 83–85, 86–90, 93, 95, 100, 111, 113, 145–148, 150, 153, 154 are missing. Character, Nāgara in a Nepalese hand. Appearance, old and worn-out. Repaired with transparent paper. Letters mostly invisible. Incomplete at both ends.

The title of the work is found nowhere in the body of the manuscript.

The last owner of the MS., on the top of the first leaf, writes:

ज्योतिस्सास्त्र-भट्टोत्पलकृत-मालवीय-वराहमिहरात्मजउत्पलः ।

7380.

7396.

Substance, country-made paper. 10½ × 5 inches. Folia, 3. Lines, 13 on a page. Character, modern Jaina Nāgara. Appearance, fresh.

A collection of *ślokas* on horoscopy marked from 16 to 100.

7381.

7116.

Substance country-made paper. 10 × 4½ inches. Folium, 1. Lines, 15, 12. Character, modern Jaina Nāgara. Appearance, fresh.

This leaf contains rules (in Sanskrit of a sort and sometimes also in Marwari) for restoring a lost horoscope.

On the left-hand upper margin of the reverse of the leaf we have:

नष्टपत्रिकाविचारसंपूर्णं ।

The scribe's name:

मुनि अमर सागर लिषतं ।

7382.

10100. **नवाबखानखाना** *Nawābkhānkhānā.*

Substance, country-made paper. 9×4 inches. Folia, 27. Lines, 10 on a page. Character, Nāgara of the 17th century. Appearance, old and repaired.

It contains the horoscope of Nawāb Mahavat Khān Khānkhānān, from his 28th year.

2A, श्रीमन्नृपविक्रमादित्यराज्यसमयातीतसंवत्सरेषु १६६८ शालिवाहनशकवत्सरस्तु १५६३ यावनशकपातवर्षेषु १०५० श्रीमत्सार्वभौमसाहजहां पातिसाहराज्यातीत सामास्तु १३ गुरु-मानेन विक्रतवत्सरे .... वसन्तर्त्तौ महामाङ्गल्यप्रदे विन्ध्योत्तरभागे वैशाखे मासि बहुले पक्षे तिथौ दर्शे ३० घटी ११ पल ३७ सिते बुधवासरे .... श्रीमन्नवाब-महावतिखान-खानखानानन्दस्य निखिललोकानन्दस्य युवतिजनमनोरञ्जनस्य सुरत्रागापूर्णकृपाभाजनस्य .... श्रीमन्नवावलुहराशि ... ... वर्यस्य अष्टाविंशोवर्षे २८ प्रवेशः ।

7383.

6348. **जन्मपत्रलिखनक्रमः ।** *Janmapatralikhanakrama.*

By Viśvanātha.

Substance, country-made paper. 10×4½ inches. Folia, 29. Lines, 11 on a page. Extent in ślokas, 725. Character, Nāgara. Date, Saṃvat 1845 = Śaka 1714. Appearance, discoloured. Complete.

It gives the form of a horoscope, and takes, as a specimen, that of Khuram, who became emperor under the name of Sājāhān. The author's name is Viśvanātha and speaks of Jahāngīra, the father of Sājāhān, as the reigning monarch.

The *maṅgalācaraṇa* and the object of the work:

श्रीगणेशाय नमः ।

सिन्दूरारुणसिन्धुरास्यचरणाम्भोजं प्रणम्यादरात्
दैवज्ञार्यदिवाकरस्य तनयः श्रीविश्वनाथाह्वयः ।
दिष्टं लोचन-जन्मपत्रलिखनप्रस्तावविस्तारधी-
विस्तीर्णं विदधाति तत्क्रममिह ज्योतिर्विदां तुष्टये ॥

Then it goes on:

स्वस्ति श्रीर्जयमङ्गलमभ्युदयश्चास्तु । अथास्य दीर्घमायुःसूचनार्थमाशीर्वादपद्यानि लिख्यन्ते ।

5A, अथ स्वस्ति श्रीमन्नृपतिविक्रमार्कराज्यगतसंवत् १६४८ वर्षे शालिवाहनशके १५ १३ प्रवर्त्तमाने शर्वरीनाम्नि संवत्सरे उत्तरायणस्थे भास्करे शिशिरर्त्तौ माघे मासि शुक्ले पक्षे प्रतिपदि बुधवासरे घटी ३ प्रमितायां उपरि द्वितीयायां श्रवणनक्षत्रे घटी ५४ पेल २ प्रमिते वज्रयोगे घटी ५ पल ४ प्रमिते उपरि सिद्धियोगे अत्र समस्तदिने घटी २५ पल २२ गते रात्रिगतघटी १२ पल ३१ समये कन्यालग्ने बुधक्षेत्रे चन्द्रहोरायां शनिद्रेक्काणे शुक्रसप्तांशे भौमनवांशे शनिद्वादशांशे बुधत्रिंशांशे एवंविधशुभाधिकवर्गेऽस्यां कल्याणवतीवेलायां समस्तसामन्तसीमन्तिनीसिन्दूरपूर-दूरीकरणकारणं ... ...

(The epithets cover more than a page.)

5B, श्रीमज्जहाङ्गीरसार्वभौमस्तस्मात् तत्तुल्यगुणः श्रीमत्खुरम-सुलतानाभिधः कुमारः समजनि प्रदीपादिव दीपः etc. etc. etc.

It ends :

वंशो विस्तारमायातु कीर्त्तिर्यातु दिगन्तरम् ।
आयुर्विपुलतां यातु यस्यैषा जन्मपत्रिका ॥
अव्याधिना शरीरेण मनसा च निराधिना ।
पूरयन्नर्थिनामाशास्त्वं जीव शरदां शतम् ॥

Colophon :

इति विश्वनाथविरचितजन्मपत्रलिखनक्रमः ।

Post-colophon :

शुभं भूयात् श्रीरस्तु सर्वजगतां संवत् १८४५ शके १७१४ ज्येष्ठ-
कृष्णाष्टम्यां रवौ लिलेख ठाकुरदत्तः काश्यां स्वार्थम् ।

Then there are four lines about the hearing of one's horoscope from the lip of the astrologer.

7384.

7938.

Substance, country-made paper. $7 \times 5\frac{1}{4}$ inches. Folia, 10. Lines, 6 on a page. Extent in ślokas, 70. Character, Nāgara. Date, Saṃvat 1646. Appearance, old, discoloured and faded. Complete.

A work on Jyotiṣa, relating to auspicious and inauspicious moments for religious observances and ceremonies.

Beginning :

श्रीगणेशाय ॥

रेवत्युत्तररोहिणीमृगमघामूलानुराधाकर-
स्वाती + + + + तुलामिथुनयोर्लग्ने विवाहः शुभः ।
मासाः फाल्गुनमाघमार्गशुचयो ज्येष्ठस्तथा माधवः
शस्ताः सौम्यदिने तथैव तिथयो रिक्ता कुहूवर्जिता ॥

9B, बालानां शुभकर्मशास्त्रसमयज्ञानं किलैकैकशः
शलोकाद + ति संकल + + + + लोकांश्चतुर्विंशतिं ।
